# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ षष्ठः सर्गः॥(सोत्कण्ठवैकुण्ठ)

(आर्या)

अथ तां(ङ्) गन्तुमशक्तां(ञ्) चिरमनुरक्तां(लँ्) लतागृहे दृष्ट्वा ।
तच्चरितं(ङ्) गोविन्दे मनसिजमन्दे सखी प्राह ॥ 1॥

### ॥ गीतम् 12 ॥

(अथ द्वादशप्रबन्धो गुणकरीरागेण रूपकताले गीयते)

पश्यति दिशि दिशि रहसि भवन्तम् ।
तदधरमधुरमधूनि पिबन्तम् ॥
नाथ हरे जय नाथ हरे सीदति राधाऽऽवासगृहे ॥ 1॥

त्वदभिसरणरभसेन वलन्ती ।
पतति पदानि कियन्ति चलन्ती ॥ 2॥ नाथ हरे

विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥ 3॥ नाथ हरे

मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीला ॥ 4॥ नाथ हरे

त्वरितमुपैति न कथमभिसारम् ।
हरिरिति वदति सखीमनुवारम् ॥ 5॥ नाथ हरे

श्लिष्यति चुम्बति जलधरकल्पम् ।
हरिरुपगत इति तिमिरमनल्पम् ॥ 6॥ नाथ हरे

भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा ॥ 7॥ नाथ हरे

श्रीजयदेवकवेरिदमुदितम् ।
रसिकजनं(न्) तनुतामतिमुदितम् ॥ 8॥ नाथ हरे

(मालिनी)

विपुलपुलकपालिः(स्) स्फीतसीत्कारमन्तर्-
जनितजडिमकाकुव्याकुलं(वँ) व्याहरन्ती ।
तव कितव विधायामन्दकन्दर्पचिन्तां(म्)
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥ 1॥

(शार्दूलविक्रीडितेन)

अङ्गेष्वाभरणं(ङ्) करोति बहुशः(फ्) पत्रेऽपि सं(ञ्)चारिणि
प्राप्तं(न्) त्वां(म्) परिशङ्कते वितनुते शय्यां(ञ्) चिरं(न्) ध्यायति ।
इत्याकल्पविकल्पतल्परचनासं(ङ्)कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां(न्) नेष्यति ॥ 2॥

(शार्दूलविक्रीडितेन)

किं(वँ) विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि
भ्रातर्याहि न दृष्टिगोचरमितः(स्) सानन्दनन्दास्पदम् ।
राधाया वचनं(न्) तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः ॥ 3 ॥

॥ इति गीतगोविन्दे वासकसज्जावर्णने सोत्कण्ठवैकुण्ठ नाम षष्टः(स्) सर्गः ॥

